प्रदो मतः । हिपास्त्वथुकरा ह्रस्वा होनपार्श्वाश्च वृद्धिदाः । पुष्करं होनमव्यक्तं विद्याद्भर्त्तृविनाशनम् । युक्तमाने निगाले च निर्म्मलस्त्रोतसी शुभे । सुसमाहिते च स्यातामुत्पलाग्रसमद्युती । उन्नद्धौ क्रमवृद्धौ च स्निग्धावभ्युदितौ समम् । दक्षिणौ च समानौ च प्रहारप्रगुणच्छवी । ततः प्रदक्षिणावर्त्तावुदात्तौ दन्तिनां रदौ । करस्य गात्रतो चापि श्वेतास्थिसदृशद्युती । विषाणे च तथा स्यातां चापाग्रे वारणस्य च । यो दक्षिणैकदन्तस्य श्रिया तु रहितो गजः । वामैकदन्तो दन्ती च दुःखदः स्वादिनोमतः । दशां प्राप्य चतुर्थीं च द्वितीयां यस्य न द्विजौ । स्थूलावनायतौ स्यातां स मूढो नाम दुर्गजः । जङ्घसंस्थानवक्रौ च प्रतिमानगतौ न वा । युयुत्सामिव कुर्व्वाणा यस्य बालाः सदुर्द्विपः । दन्तौ हलोपमौ यस्य दीर्घौ पार्श्वेन चोन्नतौ । दक्षिणेन विषाणेन वामदन्तदरन्तथा । कारयेद्यस्तु मातङ्गो वामदारी स वै भवेत् । तथा दक्षिणदारी च दक्षिणदरणं तथा । वामेन कारयेन्नोष्टो यातुः स्वामिनएव सः । तथा हलविशालेन दन्तेनैकेन दन्तिनः । स्थूलेनाखर्वदीर्घेण दुःस्थिताख्योऽपि वर्ज्जितः । अन्तर्नताभ्यां सदृन्तः कुदन्तोऽपि नतावधः । कूपे वामोन्नतिश्चापि रदाभ्यां द्विरदः क्वचित् । दन्तदुर्वासमाख्यो हि द्विरदोऽमध्यलक्षणः । बहिर्नतौ हस्तलम्बौ रदौ यस्य स दुर्गजः । कृष्णायतौ रदौ मूले विनह्निन्ति मदागतिम् । श्यामलाकाररदनाग्रन्थिसदृशनास्तथा । दुर्जाता विषमा वक्रफलकाश्च कृशास्तथा । अतिदीर्घातिह्रस्वाश्च वदनेनाघशंसिनः । त्रिरत्निमितमेढस्य पञ्चरत्निमितोरदः । यष्टिदन्तोनुकथितो राजपुत्र ! मनोषिभिः । प्रपूर्णं प्रतिमानञ्च ताराभं बलिवर्जितम् । सूक्ष्मविन्दु समानञ्च मृदुत्वक्कायरोमशम् । स्वायतं पृथुबाहित्यं सर्व्वगात्रसमाहितम् । रक्तौष्ठतालुदशनविलग्नसुत्वणस्थितिम् । तं राजा वर्जयेत् युद्धे शुभलक्षणवर्जितम् । बालार्कसदृशे यस्य हरिवर्णविलोचने । मनःशिलाप्रभे वापि हर्यक्षोऽसौ सुभिक्षदः । पद्मापाङ्गे च विपुले सुप्रसन्ने सितासिते । यस्याक्षिणी सचाक्षिभ्यां विभक्ताख्यो हितप्रदः । यस्य तुङ्गे च नयने महती दृष्टिमण्डले । स्निग्धनिर्म्मलवर्त्मस्य तारकाक्षः स सम्मतः । यस्याम्बुजः समाभासे वृत्ताकारे विलोचने । पारावताक्षं नागं तं प्रशंसन्ति शिवप्रदम् । ह्रस्वे नात्यायते नेत्रे प्रसन्ने सूक्ष्मदर्शने । यस्य स्यातां सचाध्यक्षो वारणः शुभलक्षणः । ईषद्गैरिकसङ्काशे दृश्येते यस्य चाक्षिणी । ध्वाङ्क्षाक्षः स विनिर्दिष्टो दुर्भिक्षारिभयावहः । कृष्णापाङ्गे शुभे नेत्रे कांस्यसदृशसप्रभे । यस्य स्यातां भवेच्चायं स्मूकराक्षः स गर्हितः । समन्ततो नोपचिते संसृष्टे च मनागृदृशौ । प्रौढाक्षिकूटौ यस्यापि विष्वगक्षः स दुर्भगः । वैषम्याद्विषमप्रेक्षी नेष्टो हरितया दृशा । तथा निष्प्रभया दृष्ट्या वर्ज्जितः कालपिङ्गलः । तन्द्रीयस्यानुदृश्येत विरूपं विषमं तथा । तथैव तिर्य्यग्दृक् हस्ती तिर्य्यक्प्रेक्षी स दूषणः । अधःप्रेक्षी च यो यः स्यादूर्द्धगामिविलोचनः । सदृशो बभ्रुमार्जारप्रभृत्यसतचक्षुषाम् । स स्यादनिष्टदृक् हस्ती तिर्य्यक्प्रेक्षी च दूषणः । अधःप्रेक्षी च सन्त्रेयो मृदूर्द्धगामिदर्शनः । दृष्टिः स्निग्धा प्रफुल्ला च सुस्थितामलतारका । ऊर्द्धपक्ष्म प्रसन्नस्य वारणस्य विलोक्यते । उदग्रतारको नाम्ना साम्ना पार्श्वविसर्पिणी । विस्तब्धाचलपक्ष्मा तु कुपिताऽनेकपस्य दृक् । सर्वाङ्गलक्षणेभ्योऽपि चक्षुर्लक्षणमुत्तमम् । इत्येवं लक्षणज्ञानां पूर्वेषामनुशासनम् । प्रशस्तनेत्रे द्विरदे न्टपोभद्राणि पश्यति” मस्तकादिलक्षणन्तु प्रायेण बार्हस्पत्योक्तलक्षणसममित्यतस्तन्नोक्तं यत्र विशेषस्तदुच्यते । “एककूपप्रजातानि स्निग्धानि च मृदूनि च । रोमाणोष्टानि रोमणाञ्च पेचको दक्षिणाङ्गजः । लाङ्गूलस्यैव रोमाणि दृश्यन्ते यस्य हस्तिनः । संहतानि विचित्राणि स पूज्यो वारणोरणे ।”

करिणो वामनत्वादौ कारणान्तरं तत्फलञ्चोक्तं तत्रैव “वाय्वाकाशगुणाधिष्ठपृथिवीगुणसर्ज्जनात् । जायते किल मातङ्गः कुब्जो वा वामनोऽपि च । यतो भूतगुणोऽन्योन्यमधितिष्ठति मानतः । तैर्गुणै र्जायते खर्वो दन्तीति मुनयो विदुः । हीनाङ्गोहानिकारी स्यादधिकाङ्गोऽधिकं हरेत् । राष्ट्राहितौ भवेताञ्च खञ्जकुब्जाविति स्थितिः । आयामानाहसंयुक्तो ह्रस्वाकारो हि वामनः । नष्टोव्यन्तरनिर्याणो महास्थिसगदोऽपि च । अस्थिश्वेतौ च रूक्षौ च दन्तौ यस्याश्रितौ करम् । स घातयित्वा राजानं हत्वा वाथ पलायते । ह्रस्वमेढ्राङ्गुलिकरः श्रोत्राश्रिश्वेतरोमयुक् । कपिकौशिककाकाहिनकुलप्रख्यलोचनः । कालपिङ्गलनेत्रस्च तन्वाननहनुस्तथा । बल्या समाननिर्याणः प्रत्यग्रपृथुपेचकः । मण्डूकाभरुचित्वक् च साम्नानलसमोऽपि च । परिमण्डलकर्णस्च स्पष्टध्वाङ्क्षशिवध्वजः । प्रौढोन्नताक्षिकूटाक्षः सकिलासाङ्घ्रिमेहनः । व्यालदृत्यवगन्तव्यो निर्मदो दन्तिदूषणः । सबली यस्य संदानौ प्रोहौ चापि कचाचितौ । चिवुके चायतस्थूले कर्णैस्च तनुराविला । अधोवक्राणि रोमाणि